सान्तमहतः संयोगस्य । (१०/३१७)

सकारान्तस्य संयोगस्य यो नकारः महतश्च तस्योपधायाः दीर्घो भवति सर्वनामस्थाने परतः असम्बुद्धौ । श्रेयान्, श्रेयांसौ, श्रेयांसः । श्रेयांसि । पयांसि । यशांसि । महतः स्वल्वपि – महान्, महान्तौ, महान्तः[1] । असम्बुद्धौ इति [2]किम् ? हे श्रेयन् । हे महन् ॥

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् । (११/२७७)

[3]अप् इत्येतस्य, [4]तृनन्तस्य, तृजन्तस्य, स्वसृ नप्तृ नेष्टृ त्वष्टृ क्षत्तृ होतृ पोतृ प्रशास्तृ इत्येतेषां चाङ्गानामुपधाया दीर्घो भवति सर्वनामस्थाने परतो[5]ऽसम्बुद्धौ । अप् – आपः[6] । बह्वाम्पि तडागानि इति केचिद् इच्छन्ति, तत्र [7]समासान्तो विधिरनित्यः इति समासान्तो न क्रियते । नित्यमपि [8]च नुममकृत्वा दीर्घत्वमिष्यते । तृन् – [9]कर्तारौ कटान् । [10]वदितारौ जनापवादान् । कर्तारः । तृच् – कर्तारौ कटस्य । कर्तारः । [11]हर्तारौ भारस्य । हर्तारः । स्वसृ – स्वसा, स्वसारौ, स्वसारः । नप्तृ – नप्ता, नप्तारौ, नप्तारः । नेष्टृ – नेष्टा, नेष्टारौ, नेष्टारः । त्वष्टृ – त्वष्टा, त्वष्टारौ, त्वष्टारः । क्षत्तृ – क्षत्ता, क्षत्तारौ, क्षत्तारः । होतृ – होता, होतारौ, होतारः । पोतृ – पोता, पोतारौ, पोतारः । प्रशास्तृ – प्रशास्ता, प्रशास्तारौ, प्रशास्तारः । नप्त्रादीनां ग्रहणमव्युत्पत्तिपक्षे विध्यर्थम् । व्युत्पत्तिपक्षे नियमार्थम्, एवम्भूतानामन्येषां सञ्ज्ञाशब्दानां दीर्घो मा भूत् इति । पितरौ, पितरः । मातरौ, मातरः । असम्बुद्धौ इति [12]किम् ? हे कर्तः । हे स्वसः ॥

इन्हन्पूषार्यम्णां शौ । (१२/३५६)

इन् हन् पूषन् अर्यमन् इत्येवमन्ताना[13]मङ्गानां शौ परत उपधाया दीर्घो भवति । बहुदण्डीनि । बहुच्छत्रीणि । बहुवृत्रहाणि । बहुभ्रूणहानि । बहुपूषाणि । बह्वर्यमाणि । सिद्धे सत्यारम्भो नियमार्थः, इन्हन्पूषार्यम्णामुपधायाः शावेव दीर्घो भवति नान्यत्र (म. भा. ३.१८२) । दण्डिनौ । छत्रिणौ । वृत्रहणौ । पूषणौ । अर्यमणौ ।

दीर्घविधिर्य [14]इहेन्प्रभृतीनां तं विनियम्य सुटीति सुविद्वान् ।
शौ नियमं पुनरेव विदध्यात् भ्रूणहनीति तथास्य न दुष्येत् ॥
शास्मि [15]निवर्त्य सुटीत्यविशेषे शौ नियमं कुरु वाप्यसमीक्ष्य ।
दीर्घविधेरुपधानियमान्मे [16]हन्त यि दीर्घविधौ च न दोषः ॥
सुटचपि वा प्रकृतेऽनवकाशः शौ नियमोऽप्रकृतप्रतिषेधे ।
यस्य हि शौ नियमः सुटि नैतत्तेन [17]न तत्र भवेद्विनियम्यम् ॥ (म.भा. ३.१८३)

हन्तेः 'अनुनासिकस्य क्विझलोः क्ङिति' (२.४.१५/२६६६) इति दीर्घत्वं यत् तदपि [18]नियमेन बाध्यते वृत्रहणि, भ्रूणहनि इति । कथम् ? योगविभागः [19]क्रियते । इन्हन्पूषार्यम्णाम् सर्वनामस्थाने एव दीर्घो

1. महान्तं, महान्तौ इत्यधिकम् ह. 2. एव फ.ह. 3. सर्वनामस्थाने चासम्बुध्दौ इति वर्तते इत्यधिकम् ह. 4. तृनन्तस्य नास्ति अ.ब. 5. सम्बुद्धिवर्जिते ह. 6. तिष्ठन्ति इत्यधिकम् फ. 7. समासान्तविधिः फ. 8. च नास्ति फ. 9. कर्ता, कर्तारौ फ, कटस्य ह. 10. वदिता फ, नास्ति ह. 11. नास्ति फ, भर्तारौ ह. 12. एव फ. 13. अङ्गानां नास्ति फ. 14. इन्हन्° ड. 15. निवृत्य क. 16. हन्ति ड. 17. हि क. 18. अनेन ह. 19. करिष्यते फ. ह.